Total No. of Questions : 5 Total No. of Printed Pages : 2

**Code No.: MFSA-04**

# स्नातकोत्तरपरीक्षाः - २०१५

## एम्.ए. - विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम् - अलङ्कारशास्त्रम्

### भागः - २, पत्रिका - ४

### विषयः - कादम्बरी

**दिनाङ्कः** - 29-3-2015 **गरिष्ठाङ्काः** - ८०

**समयः** - 10.00 A.M. to 1.00 P.M. Max. Marks - 80

---

**I. संक्षिप्तमुत्तरं लिखत -** **10×1=10**

१. कादम्बरी विषये प्रवादस्यानुसारेण केषामाहारोऽपि न रोचते?

२. अपूर्णा कादम्बरीं कः पूरयामास?

३. राजा स्वप्ने विलासवत्या मुखे कं प्रविशन्तमद्राक्षीत्?

४. शुकनासस्यपत्नी का?

५. चतुर्दश्यां महाकालमन्दिरे किं वाच्यमानमासीत्?

६. चन्द्रापीडः कति वर्षाणि विद्यामन्दिरे अभ्यस्तवान्?

७. तारापीडः चन्द्रापीडं विद्यामन्दिरादानेतुं कं प्राहिणोत्?

८. पत्रलेखा कस्य दुहिता?

९. चन्द्रपीडः प्रथमं कां दिशं जिग्ये?

१०. किंनामकस्य कैलासपादस्य तलभागे शिवसिद्धायतनमासीत्?

**II. वाक्यचतुष्टयं सप्रसङ्गं व्याख्यात -** **4×5=20**

१. त्वदायत्तं हि मे जीवितं राज्यं च।

२. सत्योऽयं लोकप्रवादो यद्विपद्विपदं सम्पत् सम्पदनुबध्नातीति।

३. अहो बालस्यापि सतः कठोरस्येव महद्धैर्यम्।

४. अपरिणामोपशमो दारुणो लक्ष्मीमदः

५. धर्मपरायणानां हि समीपसञ्चारिण्यः कल्याणसम्पदो भवन्ति।

६. किमिति निरर्थकमयमात्मा शिशुनेवायासितः?

- अनुवर्तते

**III. त्रयाणां प्रश्नानामुत्तरं लिखत -** **3×10=30**

१. अलङ्काराणां निवेशने बाणस्य चातुर्यं किम्? विशदयत।

२. तारापीडस्य गुणान् वर्णयत।

३. इन्द्रायुधः कः? स कीदृश आसीत्? विवृणुत।

४. चन्द्रपीडं प्रति शुकनासः लक्ष्मीविषये किमुपदिदेश?

५. शिवसिद्धायतनं कुत्रास्ति? तद्वर्णयत।

**IV. गद्यभागं सप्रसङ्गं व्याख्यात -** **1×10=10**

अस्ति सकलात्रिभुवनललामभूता, जलनिधिमथनवेलेव महाघोषपूरितदिगन्तरा, प्रस्तुताभिषेकभूमिरिव सन्निहितकनकघटकसहस्रा, गौरीव महासिंहासनोचितमूर्तिः, अदितिरिव देवकुलसहस्रसेण्या, महावराहलीलेव दर्शितहिरण्याक्षपाता, कद्रूरिव आनन्दितभुजङ्गलोका, रक्तवर्णापि सुधाधवला, अवलम्बितमुक्ताकलापापि विहारभूषणा, बहुप्रकृतिरपि स्थिरा, विजितामरलोकद्युतिः अवन्तीषूज्जयिनी नाम नगरी।।

**V. द्वयोः टिप्पणीं कुरुत -** **2×5=10**

१. शुकनासः २. पत्रलेखा ३. बाणभट्टः

---